जङ्घे चार्थक्षयो नित्यं गुदे रोगभयं भवेत् ॥
ऊर्व्वोस्तु वाहनावाप्तिर्व्वानुजङ्घेऽर्थसंक्षयः ।
वामदक्षिणयोः पादे भ्रमणं नियतं भवेत् ॥
वल्ल्याः प्ररोहणे चैव पतने शरटस्य च ।
व्यत्यासाच्च फलञ्चैव तद्वदेव प्रजायते ॥
वल्ल्याः प्ररोहणं रात्रौ शरटस्य प्रपातनम् ।
निधनार्थाय भवति व्याधिपीड़ा विपर्य्यये ॥
पतनानन्तरं चेवारोहणं यदि जायते ।
पतने फलमुत्सृष्टं रोहणेऽन्यत् फलं भवेत् ॥
आरोहणञ्चोर्द्ध्ववक्त्रे अधोवक्त्रे च पातनम् ॥
भवेदिष्टफलं तस्य तत्काले जायते ध्रुवम् ॥*॥
स्पृष्टमात्रे तयोः सद्यः सचेलं जलमाविशेत् ।
पञ्चगव्यप्राशनञ्च कुर्य्यादर्कावलोकनम् ॥
वल्लीरूपं सुवर्णस्य रक्तवस्त्रेण वेष्टयेत् ।
पूजयेद्गन्धपुष्पाद्यैस्तदग्रे पूर्णकुम्भके ॥
पञ्चगव्यं पञ्चरत्नं पञ्चामृतं सपल्लवम् ।
पञ्चवृक्षकषायञ्च निक्षिप्यावाहयेत्ततः ॥
पूजयेद्गन्धपुष्पाद्यैर्लोकपालांस्तथा ग्रहान् ।
मृत्युञ्जयेन मन्त्रेण समिद्भिः खदिरैः शुभैः ।
तिलैर्व्वाहुतिभिर्होममष्टोत्तरसहस्रकम् ॥”
वल्ली गृहगोधिका । मृत्युञ्जयमन्त्रस्त्र्यम्बकमन्त्रः
इति विद्याकरः ॥*॥ गर्गसंहितावार्हस्पत्ययोः ।
“ये तेषु शान्तिं कुर्व्वन्ति न ते यान्ति परा-
भवम् ।
ये तु न प्रतिकुर्व्वन्ति क्रियया श्रद्धयान्विताः ।
दाम्भिक्याद्वा विमोहाद्वा विनश्यन्त्येव तेऽचि-
रात् ॥”*॥
अत्र निमित्तनिश्चयवतोऽधिकारोऽन्यथा दोष
इत्याह मत्स्यपुराणम् ।
“भिन्नमङ्गलवेलायां ये भवन्त्यद्भुताः क्वचित् ।
तत्र शान्तिद्वयं कार्य्यं निमित्ते सति नान्यथा ।
निर्निमित्तकृता शान्तिर्निमित्तमुपपादयेत् ॥”
एतच्च तत्तद्विशेषविहितशान्तिविषयम् ।
अन्यथा वेलामङ्गलसन्देहे शान्तिर्न स्यात् ॥*॥
अतएवोक्तं योगियाज्ञवल्क्येन ।
“यत्र यत्र च संकीर्णमात्मानं मन्यते द्विजः ।
तत्र तत्र तिलैर्होमो गायत्र्या सहुदाहृतः ॥
गायत्र्या प्रयतः शुद्धः सर्व्वपापैः प्रमुच्यते ।
शान्तिकामश्च जुहुयात् गायत्रीमक्षतैः
शुचिः ॥
हन्तुकामश्च नृपते घृतेन जुहुयात् शुचिः ।
सावित्र्या शान्तिहोमांश्च कुर्य्यात् पर्व्वसु
नित्यशः ॥
प्रणवाद्याहुतिभ्यश्च स्वाहान्तो होमकर्म्मणि ।
प्रतिलोमा प्रयोक्तव्या फट्कारान्ताभिचारिके ॥
मार्कण्डेयपुराणम् ।
“दिग्देशजनसामान्यं नृपसामान्यमात्मनि ।
नक्षत्रग्रहसामान्यं नरो भुङ्क्ते शुभाशुभम् ।
परस्पराभिरक्षा च ग्रहदोषेषु जायते ॥”
तथा ।
“तस्माच्छान्तिपरः प्राज्ञो लोकवादरतस्तथा ।
लोकवादांश्च शान्तींश्च ग्रहपीड़ासु कारयेत् ॥
भूदोहानुपवासांश्च शस्तं चैत्यादिवन्दनम् ।
कुर्य्यात् होमं तथा दानं श्राद्धं क्रोधविवर्ज्ज-
नम् ॥
अद्रोहं सर्व्वभूतेषु मैत्रीं कुर्व्वन्ति पण्डिताः ।
वर्ज्जयेदुषतीं वाचमतिवादांस्तथैव च ॥
ग्रहपूजाञ्च कुर्व्वीत सर्व्वपीड़ासु मानवः ।
एवं शाम्यन्त्यशेषाणि घोराणि द्विजसत्तम ।
प्रयतानां मनुष्याणां ग्रहर्क्षोत्थान्यनेकशः ॥”*॥
लोकवादाश्च तत्रैवोक्ता यथा,—
“आकाशदेवतानाञ्च देवादीनाञ्च सौहृदात् ।
पृथिव्यां प्रतिलोके च लोकवादा इति स्मृताः ॥”
ते च सर्व्वभूतडाकिन्याद्यभिभवशान्त्यर्थं लौकि-
कौषधमन्त्रादयः । विषहरीमङ्गलचण्डिका-
गीतादयः । चैत्यवृक्षादौ क्षेत्रपालकुलदेवता-
पूजा च ॥*॥ तथा चापस्तम्बः । सर्व्वेभ्योऽवर-
वर्णेभ्यो धर्म्मशेषान् प्रतीयादित्येक इति । धर्म्म-
शेषान् श्रुतिस्मृतिसदाचारेष्वप्रसिद्धान् इति
नारायणोपाध्यायाः ॥ भूदोहश्च पात्रं विना
भूमौ गोस्तनं निष्पीड्य दुग्धोत्सर्गः । चैत्यः
पूज्यत्वेन ख्यातो ग्रामप्रधानवृक्षः । तथा च
वाणोत्पाते हरिवंशः ।
“अनेकशाखश्चैत्यश्च निपपात महीतले ।
अर्च्चितः सर्व्वकन्याभिर्दानवानां महात्मनाम् ॥”
उषतीं अकल्याणीम् । अतिवादश्च पूज्यमति-
क्रम्य भाषणम् ॥*॥ मत्स्यपुराणम् ।
“काकस्यैकरवश्रावः प्रभाते दुःखदायकः ।
काको मैथुनकासक्तः श्वेतो वा यदि दृश्यते ॥
उलूको वसते यत्र निपतेत् वा तथा गृहे ।
ज्ञेयो गृहपतेर्मृत्युर्धननाशस्तथैव च ॥”*॥
वराहसंहितायाम् ।

“क्रीड़ानुरक्तो रतिमांसलुब्धो
भीतो रुजार्त्तः पतितो विहङ्गः ।
नाशौ गृहस्थस्य विनाशहेतु-
र्दोषः समुत्पाद्यत आहुरार्य्याः ॥

गृहे पक्षिविकारेषु कुर्य्याच्चामरतर्पणम् ।
देवाः कपोता इति वा जप्यं सप्तभिर्द्विजैः ॥

गावश्च देया विविधा द्विजानां
सकाञ्चना वस्त्रयुगोत्तरीयाः ।
एवं कृते पापमुपैति शान्तिं
मृगैर्द्विजैर्वापि निवेदितं तत् ॥”

द्विजैः पक्षिभिः । अपिना अन्यैरपि ॥*॥
भुजबलभीमे ।
“एको वृषस्त्रयो गावः सप्ताश्वा नव दन्तिनः ।
सिंहप्रकृतिकाश्चैव कथिताः स्वामिघातिकाः ॥”
सिंहप्रकृतिका गावः ॥*॥ मत्स्यपुराणे ।
“अङ्गे दक्षिणभागे तु शस्तं विस्फुरणं भवेत् ।
अप्रशस्तं तथा वामे पृष्ठस्य हृदयस्य च ॥
लाञ्छनं पिटकश्चैव ज्ञेयं विस्फुरितं तथा ।
विपर्य्ययेण विहितं सर्व्वं स्त्रीणां फलं तथा ॥”
“अनिष्टचिह्नोपगमे द्विजानां कार्य्यं सुवर्णेन च
तर्पणं स्यात् ।”शस्तः । दुःस्वप्नानिष्टदर्शनादौ घृतं
हिरण्यञ्च दद्यादिति ॥*॥ मात्स्ये ।
“नमस्ते सर्व्वलोकेश नमस्ते भृगुनन्दन ।
कवे सर्व्वार्थसिद्ध्यर्थं गृहाणार्घ्यं नमोऽस्तु ते
एवं शुक्रोदये कुर्व्वन् यात्रादिषु च भारत ।
सर्व्वान् कामानवाप्नोति विष्णुलोके महीयते
नमस्तेऽङ्गिरसां नाथ वाक्पतेऽथ बृहस्पते ।
क्रूरग्रहैः पीड़ितानामन्तताय नमो नमः ॥
संक्रान्तावपि कौन्तेय यात्रास्वभ्युदयेषु च ।
कुर्व्वन् बृहस्पतेः पूजां सर्व्वान् कामान् सम-
श्नुते ॥*॥
वैष्णवामृते व्यासः ।
“ग्रहयज्ञैः शान्तिकैश्च किं क्लिश्यन्ति नरा
द्विज ।
महाशान्तिकरः श्रीमान् तुलस्या पूजितो हरिः
उत्पातान् दारुणान् पुंसां दुर्निमित्ताननेकशः ।
तुलस्या पूजितो भक्त्या महाशान्तिकरो
हरिः ॥”
अथ ब्रह्मपुराणीयो मन्त्रः ।
“नमस्ते बहुरूपाय विष्णवे परमात्मने
स्वाहेति ॥*॥”
छन्दोगपरिशिष्टम् । अथातो रजस्वलाभिगमने
गोऽश्वभार्य्यासु गमने यमजनने विजातीय-
जनने वा काककङ्कगृध्रवकश्येनभासचिल्लकपोता-
नां गृहप्रवेशे मानुषस्योपरिविश्रामणे एषा-
मेव क्रियमाणे गृहदारारोहणे अन्येषु चाद्-
भुतेषु कल्पदृष्टेन विधिनाग्निमुपसमाधाय प्राय-
श्चित्ताज्याहुतीर्ज्जुहोति अद्भुताय अग्नये स्वाहा
सोमाय विष्णवे रुद्राय वायवे सूर्य्याय मृत्यवे
विश्वेभ्यो देवेभ्यः स्वाहेति स्थालीपाकाद्धुताज्य-
दिति ॥*॥ कपोतं विशेषयति शौनकः ।
“रक्तपादः कपोताख्यो अरण्यौकाः शुकच्छविः ।
स चेच्छालां विशेच्छालासमीपञ्च व्रजेद्यदि ।
अन्येषु गृहमध्ये वा वल्मीकस्योद्गमादिषु ॥”
कल्पदृष्टेन विधिना गृह्योक्तेन प्रायश्चित्ताज्या-
हुतीः अद्भुतदोषप्रशमनार्थाः समाज्याहुतीः
अद्भुतायाग्नये स्वाहा इत्यादिमन्त्रैः ततः स्थाली-
पाकेति कर्त्तव्यतया पायसचरुभिरेतेभ्यो देवेभ्यो
जुहुयात् । छन्दोगपरिशिष्टम् । पश्चात् घृत-
पायसेन ब्राह्मणान् भोजयित्वा गोवरं दत्त्वा
शान्तिर्भवतीति । गोवरं गोश्रेष्ठम् । दक्षिणां
तां गां कृत्वा दोषशान्तिर्भवतीति । तथा
चोक्तम् ।
“गौर्विशिष्टतमा लोके वेदेष्वपि निगद्यते ।
न ततोऽन्यद्वरं यस्मात् तस्माद्गौर्वरमुच्यते ॥”
छन्दोगपरिशिष्टम् । यस्त्वेषामन्यतममापन्नः प्राय-
श्चित्तं न कुर्य्यात्तस्य गृहपतेर्मरणं सर्व्वस्वनाशो
वा भवति तस्मात् प्रायश्चित्तं कर्त्तव्यं कर्म्माप-
वर्गे वामदेव्यगानं शान्तिः शान्तिरिति । अप-
वर्गे समाप्तौ । वामदेव्यगानं शान्तिः कार्य्या ।
आवृत्तिः प्रकरणसमाप्त्यर्था । बार्हस्पत्ये ।
“शमयन्त्यासन्नाहात् कन्यादिकृतं निमित्त-
मात्रेव ।
अतिवर्षणोपवासव्रतदीक्षाजप्यहवनानि ॥*॥”